National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 188-191
© 2025 NJHSR
www.sanskritarticle.com

**स्वर्णाली पात्र**
शोधच्छात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्ध्रप्रदेशः

**Correspondence:**
**स्वर्णाली पात्र**
शोधच्छात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्ध्रप्रदेशः

# सिद्धार्थचरितमहाकाव्ये छन्दस्समीक्षणम्

**स्वर्णाली पात्र**

चुरादिगणीयछन्द्-धातोः घञ्प्रत्यये आह्लादनार्थे छादनार्थे च छन्दःशब्दो निष्पद्यते। **छन्दांसि छादनात्** इति निरुक्तवचनानुसारं येन भावरसादयः आच्छादिताः भवन्ति तच्छन्दः। अतः छादकत्वं सीमाबन्धनञ्च छन्दसः सामान्यलक्षणम्। अथवा चदि आह्लादने दीप्तौ च (भ्वा.धा.) इति धातोः चन्दयति आह्लादयतीति व्युत्पत्त्या **चदेरादेश्च छः**[1] इति सूत्रेण छकारादेशे असुन्प्रत्यये सति छन्दःशब्दो निष्पद्यते। अतो येन सहृदयपाठकानाम् आह्लादः आनन्दो वा जायते तच्छन्दः।

**❖ छन्दसो माहात्म्यम् -**

छन्दः पादौ तु वेदस्य[2] पाणिनीयशिक्षावचनानुसारेण छन्दो वेदस्य पाद इत्युक्तमस्ति। एवञ्च छान्दोग्योपनिषदनुसारं छन्दः सर्वभयविनाशकारिसाधनं भवति। मृत्युं दूरीकृत्य एतदमरत्वं ददाति। छान्दोग्योपनिषदि देवतानाममरत्वप्राप्तये सुरक्षाकवचरूपेण छन्दसः प्रतिपादनमकारि। एकदा देवताः मृत्युर्भयेन त्रयीविद्यायां प्रविष्टवन्तः। ततश्छन्दोभिरात्मानमाच्छादितवन्तः। उक्तञ्चास्ति –

**देवा वै मृत्युर्विभ्यतस्त्रयीं विद्यां प्राविँस्ते।**
**छन्दोभिराच्छादयन्यदेभिच्छद्यँस्तच्छन्दसां छन्दस्त्वम्॥**[3]

**❖ छन्दोभेदाः –**

छन्दः आदौ लौकिकवैदिकभेदेन द्विधा विभज्यते। वैदिकच्छन्दसां सामान्यपरिचयः तु वेदाङ्गत्वेन भवति तस्मात् हेतोः लौकिकच्छन्दसां विवरणमत्र प्रस्तूयते। तत्र लौकिकं छन्दः साधारणतया द्विविधो भवति।

वृत्तिच्छन्दः, मात्राच्छन्दः च। उक्तञ्च छन्दःप्रकाशे–

**मात्रावर्णविभेदेन छन्दो द्विविधमुच्यते।**
**विधां तृतीयामप्याहुरक्षरच्छन्दसां परे॥**[4]

तथैव वृत्तरत्नाकरे केदारभट्टेनापि छन्दसो द्वैविध्यं प्रत्यपादि यथा –

**पिङ्गलादाभिराचार्यैः यदुक्तं लौकिकं द्विधा।**
**मात्रावर्णविभेदेन छन्दस्तदिह कथ्यते॥**[5]

छन्दोमञ्जर्यनुसारं चतुष्पदात्मकं पद्यं द्विविधं भवति– वृत्तम्, जातिश्च। तत्र वृत्तम् अक्षरसंख्यानम्। जातिश्च मात्राकृता। जातिच्छन्दः एव मात्राच्छन्दः इति उच्यते। उक्तञ्च–

**अक्षरैर्गणना यत्र तद्वृत्तमिति कथ्यते।**
**मात्राभिर्गणना यत्र सा जातिरभिधीयते॥**

एतेषां सर्वेषां जातिवृत्तलौकिकछन्दसां लक्षणपरिशीलनार्थं केचनावधेयांशाः भवन्ति। तद्यथा– पद्यम्, गुरुलघुविचारः, यति विरामविचारो वा, गणपरिचयः, संख्यावाचकशब्दज्ञानञ्च। तत्र पद्यं वृत्तं वा साधारणतया चतुष्पदी भवति। पद्यानामपि पाददृष्ट्या त्रिधा भेदः क्रियते। यथा समवृत्तम्, विषमवृत्तम्, अर्धसमवृत्तञ्च। एतेषु वृत्तेषु विद्यमानानि त्रीणि त्रीणि अक्षराणि स्वीकृत्य एकः गणो भवति। छन्दशास्त्रे अष्टौ गणाः समुद्भाविताः। तद्यथा–

**मगणो यगणश्चैव रगणस्सगणस्तथा।**

**तगणो जगणश्चैव भगणो नगणस्तथा॥**

गणेषु अक्षराणि गुरुलघ्वात्मकानि भवन्ति। तत्र एकमात्रो लघुः, द्विमात्रो गुरुः, त्रिमात्रस्तु प्लुतसंज्ञको भवति। तथा च उक्तमस्ति यत्–

**एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते।**
**त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम्॥**
**सानुस्वारश्च दीर्घश्च विसर्गो च गुरुर्भवेत्।**
**वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा॥**[6]

तत्र गुरुः वक्रचिह्नेन (ऽ), लघुश्च दण्डाकारेण (।) विलिख्यते। तथा च उक्तमस्ति यत्–

**वक्ररेखा गुरोश्चिह्नं सरला च लघोस्तथा।**
**गुरुरेको गकारस्तु लकारो लघुरेककः॥**

एवं **यमाताराजभानसलगम्** इत्यनेन सूत्रेण गणानां ह्रस्वदीर्घ-स्वरूपविचारः कर्तुं शक्यते। यस्य तावद्गणस्य स्वरूपजिज्ञासा भवति ततः प्रारभ्य परवर्तिवर्णद्वयं स्वीकृत्य तद्गणस्य स्वरूपं निर्मातव्यम्। यथा च यगणस्य कृते यमाता इति वर्णत्रयं स्वीक्रियते।

**आदिमध्यावसानेषु भजसा यान्ति गौरवम्।**
**यरता लाघवं यान्ति मनौ तु गुरुलाघवम्॥**

आचार्यबुद्धघोषविरचिते सिद्धार्थचरितमहाकाव्ये विविधछन्दसां प्रयोगो दरीदृश्यते। इन्द्रवज्रा, उपेन्द्रवज्रा, मालिनी, शालिनी, रथोद्धता, वसन्ततिलका, वियोगिनी, उपजातिः, वैतालीयम्, मन्दाक्रान्ता, शार्दूलविक्रीडितम्, अनुष्टुप्, पुष्पिताग्रा, वंशस्थमिति आहत्य चतुर्दशछन्दसां प्रयोगो वर्तते। तत्र क्रमेण सिद्धार्थचरित-महाकाव्ये छन्दसां प्रयोगः समाचलोच्यते। यथा—

**❖ अनुष्टुप्-**

अनुष्टुप्-छन्दः अष्टाक्षरविशिष्टं वर्तते अर्थात् प्रत्येकं पादेऽष्टौ अक्षराणि भवन्ति। अस्य छन्दसो लक्षणं यथा-

**श्लोके षष्ठं गुरुर्ज्ञेयं सर्वत्र लघु पञ्चमम्।**
**द्वितूर्यपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥**

प्रायः नवमसर्गः अनुष्टुब्छन्दसा एव विरचितम् आचार्यबुद्धघोषेण। तथा च श्लोकः-

**आगत्य गेहमध्यास्य कुमारो भद्रपीठिकाम्।**
**आरब्धं मातृधात्रीभिरारात्रिकमुपाददे॥**[7]

**❖ इन्द्रवज्रा—**

समवृत्तेषु इन्द्रवज्रा अन्यतमा। अस्मिन् छन्दसि पादचतुष्टयं भवति। प्रतिचरणञ्च ११ अक्षराणि भवन्ति। लक्षणं तावद् वृत्तरत्नाकरे उच्यते—

**स्यादिन्द्रवज्रा यदि तौ जगौ गः।**[8]

अस्य प्रतिचरणं तगणः(ऽऽ।) तगणः(ऽऽ।), जगणः(।ऽ।) गुरुः(ऽ) गुरुः(ऽ) भवन्ति। सिद्धार्थचरितमहाकाव्ये आचार्यबुद्धघोषेण इन्द्रवज्रावृत्तेन एव मङ्गलश्लोकः व्यरोचि यथा—

ऽऽ।ऽऽ।।ऽ।ऽऽऽऽऽऽ।।ऽ।ऽऽ

**कारुण्यकल्लोलितदृष्टिपातं कन्दर्पदर्पानलकालमेघम्।**
**कैवल्यकल्पद्रुममूलकन्दं वन्दे महाकन्दलमर्कबन्धुम्॥**[9]

**❖ उपेन्द्रवज्रा—**

समवृत्तेषु उपेन्द्रवज्रा अपि प्रसिद्धा। अस्मिन् वृत्ते अपि पादचतुष्टयं भवति। प्रतिचरणञ्च ११ अक्षराणि भवन्ति। लक्षणं तावद् वृत्तरत्नाकरे उच्यते—

**उपेन्द्रवज्रा जतजास्ततो गौ॥**[10]

अस्मिन् छन्दसि प्रत्येकं पादे जगणः(।ऽ।), तगणः(ऽऽ।) जगणः(।ऽ।), गुरुः(ऽ), गुरुः(ऽ) विलसन्ति। तथा च सिद्धार्थचरिते आचार्यबुद्धघोषः आचार्यबुद्धं प्रति
स्वभक्तिं प्रदर्शयन् आह—

।ऽ।ऽऽ।।ऽ।ऽऽ ।ऽ।ऽऽ।।ऽ।ऽऽ

**तथापि तत्राहितभक्तिशक्त्या तदेतदाख्यातुमहं प्रवीणः।**
**तथाहि तत्पादसमाश्रयेण रजोऽपि लक्ष्मीं कुरुते हि पुंसाम्॥**[11]

**❖ उपजातिः—**

समवृत्तेषु उपजातिः अन्यतमा। अत्र द्वयो समानजातिकयोः छन्दसोः मिश्रणं भवति। यथा इन्द्रवज्रा-उपेन्द्रवज्रयोः, स्वागता-रथद्धतयोः, इन्द्रवंशा-वंशस्थयोः इत्यादि। अत्र प्रतिचरणं ११ अक्षराणि भवन्ति। श्रीमद्वसन्तत्र्यम्बकशेवडेकृतवृत्तमञ्जर्याम् उपजातेः स्पष्टं लक्षणं भवति –

**उपेन्द्रवज्राचरणः प्रयाति यत्रेन्द्रवज्राचरणेन योगम्।**
**छन्दोविदस्तामुपजातिमाहुर्भवन्ति भेदा बहवस्तदीयाः॥**[12]

अस्या उपजातेः १४ भेदाः सम्भवन्ति तद्यथा– कीर्तिः, वाणी, माला, शाला, हंसी, माया, जाया, बाला, आर्द्रा, भद्रा, प्रेमा, रामा, ऋद्धिः, बुद्धिश्च। आचार्यबुद्धघोषेण
गर्भलक्षणवर्णनं विधाय तृतीयसर्गे व्यलेखि—

**विवर्धमानेन च मध्यमेन श्यामायमानेन च चूचुकेन।**
**गर्भोदयोऽभूदलसेक्षणायास्तस्याः सखीनामनुमानगम्यः॥**[13]

अत्र प्रथमपङ्क्तौ उपेन्द्रवज्रा, अन्तिमपङ्क्तित्रये इन्द्रवज्रावृत्तं वर्तते इति साङ्कर्याद् उपजातिच्छन्दः।

**❖ शालिनी—**

समवृत्तेषु अन्यतमम् एकादशाक्षरविशिष्टवृत्तं भवति शालिनी। केदारभट्टेन वृत्तरत्नाकरे अस्य लक्षणं प्रत्यपादि यथा-

**शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः॥**[14]

अस्मिन् वृत्ते एकादशाक्षराणि विद्यन्ते। प्रतिपङ्क्ति मगणः(ऽऽऽ), तगणः(ऽऽ।), तगणः(ऽऽ।), गुरुः(ऽ), गुरुः(ऽ) वर्तन्ते। तथा च सिद्धार्थचरितस्य षष्ठसर्गस्य अन्तिमपद्यं शालिनीवृत्तेन एव बुद्धघोषेण विहितम्। यथा—

ऽऽऽऽऽ।ऽऽ।ऽऽ ऽऽऽऽऽ।ऽऽ।ऽऽ

**इत्थं श्रुत्वा सारथीनां वचस्तल्लब्धोपायः संसृतेर्निष्क्रमाय।**
**सन्तुष्टान्तर्मानसो राजसूनुर्भयोऽप्यैच्छत् कर्तुमुद्यानलीलाम्॥**[15]

**❖ रथोद्धता—**

एकादशाक्षरविशिष्टं समवृत्तेषु अन्यतमं भवति रथोद्धता। केदारभट्टेनास्य लक्षणं क्रियते यथा-

**रान्नराविह रथोद्धता लगौ॥**[16]

अस्मिन् छन्दसि प्रतिचरणं रगणः(ऽ।ऽ), नगणः(।।।), रगणः(ऽ।ऽ), लघुः(।), गुरुः(ऽ) च विलसन्ति। सिद्धार्थचरिते आचार्यबुद्धघोषो वसन्तसमयं वर्णयन् आह—

ऽ।ऽ।।ऽ।ऽ।ऽ ऽ।ऽ।।ऽ।ऽ।ऽ

**अङ्गनावदनपद्मपूरणीमादरेण परिपीय वारुणीम्।**
**उद्वमाम पुनरेव केसरः स्यन्दमानमकरन्दकैतवात्॥**[17]

**❖ वंशस्थम्—**

समवृत्तेषु द्वादशाक्षरविशिष्टम् इदं छन्दो जगतीवर्गे आगच्छति। छन्दोमञ्जर्याम् अस्य लक्षणं प्रतिपाद्यते यथा—

**वदन्ति वंशस्थविलं जतौ जरौ॥**[18]

एवम् अस्य अपरं नाम भवति वंशस्थविलमपि। अस्य प्रतिचरणं क्रमशः जगणः (।ऽ।), तगणः (ऽऽ।), जगणः (।ऽ।), रगणः (ऽ।ऽ) भवन्ति। आचार्यबुद्धघोषेण षष्ठसर्गस्य मध्यभागे कानिचन पद्यानि विनिर्मितानि। तेषु अयं प्रसिद्धः श्लोको यथा—

।ऽ।ऽऽ।।ऽ।ऽ।ऽ ।ऽ।ऽऽ।।ऽ।ऽ।ऽ

**ततः कुमारस्य पुरन्दरश्रियः प्रबोधकालोऽयमिति प्रबोधितुम्।**

**क्रमेण वृद्धातुरलुप्तजीवितान् प्रदर्शयामासुरमुष्य देवताः॥**[19]

**❖ वसन्ततिलका—**

समवृत्ते अस्मिन् शर्करीचतुर्दशाक्षरच्छन्दसि प्रतिचरणं क्रमशः तगणः (ऽऽ।), भगणः (ऽ।।), जगणः (।ऽ।),जगणः(।ऽ।) गुरुः (ऽ), गुरुश्च (ऽ) भवन्ति। तदुक्तम् अस्ति छन्दोमञ्जर्यां यत्–

**ज्ञेयं वसन्ततिलका तभजा जगौ गः॥**[20]

अनेन वृत्तेन सिद्धार्थचरिते दशमसर्गे बुद्धस्य समीपं मारस्य असामर्थ्यं प्रदर्शयन् आचार्यबुद्धघोषः कथयति।

ऽऽ।ऽ।।।ऽ।।ऽ।ऽऽ ऽऽ।ऽ।।।ऽ।।ऽ।ऽऽ

**चक्रीकृतायतशरासनमास्थितेन सम्प्रेषिताः शितशरा मकरध्वजेन।**

**आसाद्य बुद्धमभजन् सुमनोमयत्वं सत्सङ्गतिः सुरलतेव न किं करोति॥**[21]

**❖ मालिनी—**

समवृत्तेषु अतिप्रसिद्धम् अतिशक्वतीवर्गान्तर्गतं भवति मालिनी। प्रतिचरणं पञ्चदशाक्षराणि भवन्ति। अस्य छन्दसः लक्षणम् उच्यते वृत्तरत्नाकरे—

**ननमययुतेयं मालिनी भोगिलोकैः॥**[22]

प्रत्येकस्मिन् चरणे क्रमशः नगणः(।।।), नगणः(।।।), मगणः(ऽऽऽ), यगणः(।ऽऽ), यगणः(।ऽऽ) च भवन्ति। सिद्धार्थचरिते चतुर्थसर्गस्य अन्तिमश्लोके उच्यते आचार्यबुद्धघोषेण मालिनीच्छन्दसा—

।।।।।।ऽऽऽ।ऽऽ।ऽऽ

**इति गतवति पुण्यैर्दीर्घदीर्घेऽपि काले**

**पतिरवनिपतीनां पुत्ररत्नं न भेजे।**

**तदपि च ववृधे तत्प्रार्थना तस्य पुंसां**

**विरमति न हि यत्न कार्यसिद्धेः पुरस्तात्॥**[23]

**❖ मन्दाक्रान्ता-**

मन्दाक्रान्तावृत्तं तु सप्तदशाक्षरात्यष्टेः भेदविशेषं वर्तते। अस्य लक्षणं तु छन्दःशास्त्रे उक्तमस्ति, तद्यथा – **मन्दाक्रान्ता म्भौ न्तौ त्गौग् समुद्रर्तुस्वराः।**[24] अर्थात् यस्य पादे मगण-भगण-नगणाः (ऽऽऽ, ऽ।।, ।।।), तगणौ (ऽऽ।, ऽऽ।) ग-गणौ(ऽ,ऽ) च वर्तन्ते तथाहि चतुर्षु, षट्सु, सप्तसु अक्षरेषु च यतिः(*) तिष्ठन्ति, तत्र मन्दाक्रान्तावृत्तं भवति। वृत्तरत्नाकरकारेण मन्दाक्रान्तावृत्तस्य लक्षणं कृतमस्ति तद्यथा–

**मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत्।**[25]

अर्थात् जलधिः (४), षट् (६), एवञ्च अग-पर्वतः (७) इत्यत्र यतिना सह क्रमेण मगणः (ऽऽऽ), भगणः (ऽ।।), नगणः (।।।), तगणः (ऽऽ।) एवञ्च द्वौ गुरू (ऽऽ) इति भवति। सिद्धार्थचरितमहाकाव्ये आचार्यबुद्धघोषेण अन्तिमश्लोकोऽनेन छन्दसैव विनिर्मितो यथा—

ऽऽऽऽ।।।।।ऽऽ।ऽऽ।ऽ ऽ

**तत्र क्षोणीरमणतनयो मण्डपे वाणिनीनां**

**नृत्तारम्भैर्निरुपमरसैर्वाद्यघोषैर्मनोज्ञैः।**

**वीणानादैः श्रवणसुभगैर्वेणुनादैश्च हृदयैः**

**श्रीमानहन्नस्त्रिभुवनगुरुः शेषमेष व्यनैषीत्॥**[26]

**❖ शार्दूलविक्रीडितम्—**

समवृत्तेषु शार्दूलविक्रीडितं तु अन्यतमम् अस्ति। एषा वृत्तिः ऊनविंशत्यक्षरा (१९) भवति। अस्य लक्षणञ्च उक्तमस्ति यत्–

**सूर्याश्वैर्यदिनः सजौ सततगाः शार्दूलविक्रीडितम्।**[27]

अर्थात् यत्र प्रतिचरणं क्रमशः मगणः (ऽऽऽ), सगणः (।।ऽ), जगणः (।ऽ।), सगणः (।।ऽ), तगणः (ऽऽ।), तगणः (ऽऽ।), गुरुश्च(ऽ) भवति तत्र एतच्छन्दो भवति। अस्मिन् छन्दसि सूर्यैः (१२), अश्वैः (७) अक्षरैः विरामो भवति। तथा चोदाहरणं भवति यत्–

ऽऽऽ।।ऽ।ऽ।।।ऽऽऽ।ऽऽ।ऽ

**इत्थं पुष्पशरासनस्य विजयव्यापारशुष्कस्थितां**

**सम्बोधिप्रमदां निवेश्य सुदृशं श्रीबोधिमूले वरः।**

**सिद्धार्थश्चिरवासनापरिगतानुच्छिद्य दोषद्विषो**

**मुक्तिक्षेत्रकुटुम्बरक्षणविधौ मूर्धाभिषिक्तोऽभवत्॥**[28]

**❖ पुष्पिताग्रा-**

अर्धसमवृत्तेषु अन्यतमं भवति पुष्पिताग्रावृत्तम्। अस्य लक्षणं तावत् केदारभट्टेन वृत्तरत्नाकरे उच्यते यथा—

**अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा॥**[29]

अर्थात् विषमे पादे नगणद्वयं रगणसगणौ अर्थाद्विषमे पादे नगणः(।।।), नगणः(।।।), रगणः(ऽ।ऽ), यगणः(।ऽऽ) समे पादे च नगणः(।।।), जगणः(।ऽ।) जगणः(।ऽ।), रगणः(ऽ।ऽ), गुरुः(ऽ) भवन्ति। तथा च सिद्धार्थचरिते वसन्तकालं वर्णयन् आह आचार्यबुद्धघोषः—

।।।।।।ऽ।ऽ।ऽऽ।।।।ऽ।।ऽ।ऽ।ऽऽ

**परिमललहरीषु पादपानां भरितसमस्तदिगन्तरापगासु।**

**जलविहरणमाचचार दीर्घं मलयमहीधरमन्दगन्धवाहः॥**[30]

**❖ वियोगिनी-**

विषमवृत्तेषु अन्यतमवृत्तं वियोगिनीवृत्तम्। तथा च अस्य लक्षणं भणितम्—

**विषमे ससजा गुरुः समे स भरलोऽथ गुरुर्वियोगिनी।**

अर्थात् विषमे सगणः(।।ऽ), सगणः(।।ऽ), जगणः(।ऽ।) गुरुः(ऽ) समे पादे सगणः(।।ऽ), भगणः(ऽ।।) रगणः(ऽ।ऽ) लघुः(।) गुरुः(ऽ) च भवन्ति। तथा च सिद्धार्थचरिते द्वितीयसर्गे तुषिताधिपतेः प्रतिसन्धिवर्णयन् आह आचार्यबुद्धघोषो यथा—

।।ऽ।।ऽ।ऽ।ऽऽ।।ऽऽ।।ऽ।ऽ।ऽऽ

**अथ कानिचिदेव वासराणि क्षपयित्वा त्रिदिवे स देवराजः।**

**विदधे विविधव्रतोज्ज्वलायां प्रतिसन्धिं पृथिवीपतेर्महिष्याम्॥**[31]

**❖ वैतालीयम्—**

वैतालीयप्रकरणे प्रथमम् आगच्छति वैतालीयनामकच्छन्दः। अस्य लक्षणं वृत्तरत्नाकरे उच्यते यथा—

**षड् विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः।**

**न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः॥**[32]

अस्य आशयः तावत् वृत्तरत्नाकरटीकायाम् उच्यते- वैतालीये छन्दसि विषमे चरणे अर्थात् प्रथमे तृतीये च पादे षट् कलाः मात्राः भवन्ति तथा समे पादे अर्थात् द्वितीये तुर्ये च चरणे अष्टौ कलाः भवन्ति। तथा अन्ते उक्तानां कलानामन्ते रलौ रगणश्च लघुश्च गुरुश्च भवन्तीति। इत्थं वैतालीयस्य प्रथमतृतीययोः पादयोः चतुर्दशकला भवन्ति।

द्वितीयचतुर्थयोः तु षोडश इति संक्षिप्तार्थः। तत्र अन्तिमानाम् अष्टानां मात्राणाम् उभयोरपि दलयोः समाना व्यवस्थितिः। ताः रगण-लघु-गुरुभिः सम्पादनीयाः। आद्यानां कलानां निवेशने नियमनम् आह— ताश्च समे स्युर्नो निरन्तराः। समे पादे ताः षट्कला निरन्तराः लघवः नः स्युः। ताः गुरुमिश्रिताः कार्याः इति भावः। समे एव नियमात् विषमे यथेच्छं कर्तव्याः। अत्र आद्यासु षट् मात्रासु विषमे पादे तथा अष्टसु मात्रासु समपादे समा द्वितीया तुर्या षष्ठी च कला पराश्रिता परया तृतीयपञ्चमसप्तम्या आश्रिता युक्ता न भवति। अर्थात् कला तृतीयया मिलिता न भवति तथैव तुर्या पञ्चम्या षष्ठी च सप्तम्या लगिते न भवतः। पूर्वाश्रिता भवितुमर्हन्ति न तु पराश्रिता इति भावः।[33] तथा च सिद्धार्थचरिते वैतालीयच्छ-न्दसा श्लोकत्रयं रचितम् आचार्यबुद्धघोषेण तेषु अन्यतमश्लोकः—

**मधुशीकरदुर्दिनान्धकारे वनलक्ष्मीरतिदूतिकोपितानाम्।**
**भ्रमरीमभिसत्वरीं प्रमत्तः सचमत्कारमरीरमद् द्विरेफः॥**[34]

लौकिकच्छन्दसां मधुरिमा सरलता रसोपादेयता भावस्फुटता महाकाव्ये अस्मिन् द्रष्टुं शक्यते। मुधुमधुमयं सरलसुन्दरं छन्दः कवीनां कण्ठभूषणस्वरूपं सदैव भाति। न कोऽपि तादृशो रसपिपासुः कविः यः छन्दांसि विहाय स्वकाव्यं रचयितुम् अभिलषते। तथैव दृश्यते महाकवेः प्रयोगः महाकाव्ये अस्मिन्। महाकाव्ये अस्मिन् मुख्यतया उपजातिच्छन्दसः प्रयोगो दृश्यते।

### ❖ समीक्षा—

आचार्यबुद्धघोषेण सिद्धार्थचरितमहाकाव्यनिर्माणाय प्रायः चतुर्दश-च्छन्दसां प्रयोगः अस्मिन् सिद्धार्थचरितमहाकाव्ये विहितः। तेषां विवरणम् अधः प्रदीयते।

अनुष्टुप्(८२), इन्द्रवज्रा(२), उपेन्द्रवज्रा(१), उपजातिः(३३६), शालिनी(१), रथोद्धता(१), वंशस्थम्(७५), वसन्ततिलका(१३२), मालिनी(२), मन्दाक्रान्ता(१), शार्दूलविक्रीडितम्(१), पुष्पिताग्रा(१), वियोगिनी(१), वैतालीयम्(३)

### ➢ सन्दर्भग्रन्थसूची-


१. **अमरकोषः।** सम्पा.डा.ब्रह्मानन्द त्रिपाठी।चौखम्बा सुरभारती प्रकाशन, वाराणसी, संस्करण-२०१५

२. **अलङ्कारशास्त्र की परम्परा।**डा. राजवंशसहायः'हीरा'। चौखम्बा-प्रकाशनम्, वाराणसी

३. **अलङ्कारसर्वस्वम्।** रुय्यकः। निर्णयसागरः, मुम्बई, सं- १८९३

४. **अष्टाध्यायी।** पाणिनिः। व्याख्या. डा. नरेशझा। चौखम्बासुर-भारतीप्रकाशनम्, वाराणसी, २०१७

५. **आधुनिक संस्कृत साहित्य का इतिहास।**वर्धमान महावीर खुला विश्वविद्यालय, कोटा

६. **ईशादि नौ उपनिषद्।** शाङ्करभाष्यसमेता। गीताप्रेस। गोरखपुर (प्रकाशक एवं मुद्रक), सं.-२०६८

७. **केनोपनिषद्।**शाङ्करभाष्यसमेता। गीताप्रेस। गोरखपुर(प्रकाशक एवं मुद्रक), सं.-२०६८

८. **चित्रमीमांसा।** अप्पयदीक्षितः। सम्पा. कालिका प्रसादशुक्लः, वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी, संस्करणम्-२०१३

९. **चन्द्रालोकः।**जयदेवः। भारतीयविद्यासंस्थानम्, वाराणसी, २००१

१०. **छन्दःप्रकाशः।** सम्पा. डा. ब्रह्मानन्दत्रिपाठी। चौखम्बासुरभारती-प्रकाशनम्, वाराणसी, संवत् २०३५

११. **छन्दोमञ्जरी।** श्रीगङ्गादासः। सम्पा. डा. ब्रह्मानन्दत्रिपाठी। चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, संवत् २०३५

१२. **तैत्तिरीयसंहिता।** गीताप्रेस। गोरखपुर।

१३. **ध्वन्यालोकः।** आनन्दवर्धनः। व्याख्या. रामसागरत्रिपाठी। मोतीलालबनारसीदासः, दिल्ली, संस्करणम्-२०१७


### पाद टिप्पणी

1 उ.सू.- ६५८

2 पा.शि.- ४१

3 छा.उ.प्रपाठकम् १, प्रवाक्२

4 छ.प्र.- २

5 वृ.- १.४

6 छ.- प्रथमः स्तवकः-११

7 सि.- ९।१

8 वृ.- पु.- ६३

9 सि.- १।१

10 वृ.- पु.-६४

11 सि.- १।३

12 वृत्तरत्नाकरे अस्य लक्षणमित्थं प्रत्यपादि-
अनन्तरोदीरित लक्ष्मभाजौ,
पादौ यदीयावुपजातयस्ताः॥३०॥
इत्थं किलान्यास्वपि मिश्रितासु।
स्मरन्ति जातिष्विदमेव नाम॥३१॥ वृ.- पु.-६४-६७

13 सि.- ३।२

14 वृ.- पु.- ६८

15 सि.- ६।४५

16 वृ.- पु.-७१

17 सि.- ६।३१

18 छ. २.६

19 सि.- ६।३५

20 छ.-२.२ वृत्तरत्नाकरे वसन्ततिलकायाः लक्षणमुच्यते-
उक्ता वसन्ततिलका तभजा जगौ गः।

21 सि.- १०।३७

22 वृ.- पु.-१००

23 सि.- १।७९

24 छ.- ७।१९

25 वृ.- ३।९५

26 सि.- ७।५९

27 छ. १०५

28 सि.- १०।५८

29 वृ.- पु.- १३८

30 सि.- ६। ३२

31 सि.- २।५५

32 वृ.- पु.-२७

33 वृ.- पु.- २७

34 सि.- ६। २८